SRIRANGAM SRI SANKARA GURUKULA SERIES No. 6.

MADRAS GOVERNMENT ORIENTAL MANUSCRIPTS SERIES No. 11

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE.
G.N.H. ROAD. MADRAS-4

DAMARUKA

OF

GHANAŚYĀMAPANDITA

(*Alias* ĀRYAKA)

EDITED BY

Vidyasagara Vidyavacaspati

P. P. SUBRAHMANYA SASTRI, B.A. (Oxon), M.A. (Madras),

urator, Government Oriental Manuscripts Library & Professor of Sanskrit & Comparative Philology, Presidency College, Madras.

SRIRANGAM

SRI VANI VILAS PRESS.

1939.

NOTE.

Ghanasyamapandita, also known as Aryaka was a famous writer of th first half of the eighteenth century and flourished under the patronage of th Mahratta King Tukkoji I (1729–1735) at Tanjore. Most of his works ar preserved in the Tanjore Palace Library. Besides being a talented writer o repute he was fortunate in possessing two wives Kamala and Sundari who were also equally gifted writers in Sanskrit.

The Damaruka of Ghanasyama is a rare dramatic work, dealing with contemporary social manners complete in ten Alankaras. Our edition is based on the only manuscript of the work available in the Madras Government Oriental Manuscripts Library—D. No. 12519 which is a paper manuscript in Devanagari script.

A detailed Introduction, Table of Contents and critical remarks on the author and the literary circle in which he lived, will be furnished on the completion of the Volume.

PRESIDENCY COLLEGE,
MADRAS.
Dated: 30—3—1939.

P. P. Subrahmanya Sastri,
Curator, Government Oriental Manuscripts Library,
Madras.

INTRODUCTION.

Royal patronage in a generous and discerning measure has always been one of the important causes for the promotion and expansion of Sanskrit language and Literature in India. The Seventeenth and Eighteenth centuries of our era were marked in South India by the composition of numerous works in Sanskrit, representative of all branches of learning, thanks to uninterrupted patronage learning and wit enjoyed at the munificent hands of the Mahratha rules of the Tanjore Kingdom.

Among the galaxy of poets who adorned the court of King Tulaja (alias Tukkoji, 1729–1735) Ghanasyama Pandita was easily one of the brightest stars in the Literary firmament. Besides being a minister to King Tulaja, administering to his political and economic wants, he was also successfully ministering to his aesthetic and spiritual wants by composing numerous works of art in all the well-known as well as recondite modes of Sanskrit composition.

Of Ghanasyama, we have fortunately abundant details regarding his parentage, his own life and lineage, preserved in his own works as well as in the works of contemporary writers.

Born of Mahadeva and Kasi, Ghanasyama had an elder brother who retired the fourth Asrama under the title of Cidambarayogin. His two wives Kamala and Sundari not only helped him in his literary adventures but immortalised themselves by commenting on his works. His son Govardhana, followed in some measure the literary path of his erudite father. Govardhana though blind from his youth composed a commentary on Ghatakarpara's works.*

Ghanasyama is the reputed author of more than one hundred works, 64 in Sanskrit, 20 in Prakrt and 25 in Vernaculars. His works include Dramas, Kavyas,

* For further details, see Mr. V. A. Ramaswami Sastri's instructive monograph on 'Pandit Ghanasyama'—Part III Vol. III of the Journal of Oriental Research, Madras.

commentaries on dramas and kavyas, works on lexicography, Rhetoric—in fact, all branches of Indian languages and literature.

Professor Macdonell remarks that "The Sanskrit dramatists.....do not show much fertility of invention" (History of Sanskrit Literature Page 349). It is not that the Sanskrit Dramatists are not possessed of the inventive faculty. The reason is rather the limited and restricted knowledge that we possess of compositions in Sanskrit. Owing to various reasons our knowledge of works in Sanskrit even today is neither full nor deep. Even if we take one type of Sanskrit Literature, the Drama, the Rhetoricians speak of as many as ten varieties of dramatic compositions, though we know of only two or three representative specimens in some of the rarer varieties. The Manuscript collections in the various Libraries in India and abroad have to be systematically explored before sweeping remarks could be passed.

"Prahasana" or Farce is a type of dramatic composition which calls for the inventive intellect of the author in quite a good measure indeed. To be able to compose a successful farce, the author must not only be a master who can wield his literary pen in whatever crooked or clever manner the situation warrants but should also have drunk deep from the well of human experience, in all its varied and varying shades. No apology is therefore needed for the publication of the Damaruka which is a farce of the first magnitude. Ghanasyama, the author, was well-known in his own day by the honorific epithets of Vasyavacah, Sarvajna and Sarasvati, signifying his unparallelled command over the Sanskrit language.

On account of the uniqueness and excellence of the Damaruka as a farce, the publication of the work was begun, even though it was represented by only one manuscript which was fairly full of lacunae also. When the work had been printed, we were fortunate in tracing a commentary on the work by Candrasekhara son of Sabdasesha in the Tanjore Palace Library.

The Commentary, though very short, is useful in explaining some obscure passages and in giving better readings where the original manuscript of the Text was not satisfactory. The Commentary as well as a list of additions and corrections based on the commentary are also printed as an appendix to this edition. The edition of Damaruka is based on the single Manuscript D. No. 12519 (a paper transcript in Devanagari script) available in the Government Oriental Manuscripts Library, Madras. The Damaruka Vyakhya is based on the Tanjore Palace Library manuscript No. 3793 noticed in Volume VI of the Descriptive Catalogue of the Sanskrit Manuscripts in the Tanjore Palace Library.

The Sri Vani Vilas Press, Srirangam deserve our thanks for coming forward to publish this rare work under the conditions laid down in G. O. No. 148 dated 2nd February 1925, whereby the Curator is empowered to publish rare works with the co-operation of private printing presses.

Thanks are also due to my esteemed colleague Pandit V. Krishnamachariar, Sanskrit Pandit of the Presidency College, Madras, for his valuable help in preparing the press-copy.

Presidency College,
Triplicane,
Madras, 15th July 1940.

P. P. Subrahmanya Sastri.
Curator, Government Oriental
Manuscripts Library, Madras.

॥ विषयसूची ॥

		पृष्ठाः
पात्रसूचना		१ — ६
प्रथमोऽलंकारः ...	राजानुरञ्जनम्	७ — ९
द्वितीयोऽलंकारः ...	कलिदूषणम्	१०—११
तृतीयोऽलंकारः ...	सुकविसंजीवनम्	१२—१३
चतुर्थोऽलंकारः ...	कुकविसंतापनम्	१४—१५
पञ्चमोऽलंकारः ...	अबोधाकरम्	१६—१७
षष्ठोऽलंकारः ...	शाब्दिकभञ्जनम्	१८—१९
सप्तमोऽलंकारः ...	पण्डितखण्डनम्	२०—२१
अष्टमोऽलंकारः ...	जातिसंतर्जनम्	२२—२३
नवमोऽलंकारः ...	प्रभुत्वम्	२४—२५
दशमोऽलंकारः ...	अखण्डानन्दनम्	२६—२८
डमरुकव्याख्यानम्..		२९—३३
Corrections and Additions		१ — २

॥ डमरुकम् ॥

घनश्यामकविकृतम् ॥

यस्यानङ्करणोत्सवो न घटते जाग्रत्यपि प्रेमणि
क्रोधे कन्दलितेऽपि यस्य विमुखीभावो न संभाव्यते ।
तस्याश्चर्यगुणाकरस्य महसो वामस्य वाऽन्यस्य वा
पादाब्जस्य पराः परागकणिकाः पायासुरायासतः ॥ १ ॥

अपि च—

अन्यस्त्री नापि दृष्टेत्यहिघटपणकृत्तद्धरत्वान्निषिद्धे
तत्सङ्गे साक्षिसिद्धे सुतनु कुचगिरेः पातयागःस्पृशं माम् ।
यद्वा वेणीकशाभिः प्रहर दलय वा दृक्शरैर्मञ्जयाहो
नाभीकूपे चिरायेत्यभिदधदुमया क्रीडितोऽव्यान्मृडो वः ॥ २ ॥

(नान्द्यन्ते)

निर्वाहकः— (परिक्रम्य पाण्डुरपटविहितनेपथ्याभिमुखमवलोक्य) मारिष, इतस्तावत् ।

(प्रविश्य)

पारिपार्श्विकः— भाव, एषोऽस्मि ।

सूत्रधारः— मारिष, 'पुरा कविभिरुच्चरितं नवनवोन्मेषमनोहरं विविधवस्तुसन्निवेशनिधानं किमपि निबन्धनं निरूप्यताम्' इति संसदा संभाव्य संदिष्टोऽस्मि ।

पारिपार्श्विकः— किमस्ति किमपि तादृक्षम् ?

सूत्रधारः -- (स्मृतिमभिनीय) अस्ति डमरुकं नाम ।

पारिपार्श्विकः— (सवैलक्ष्यम्) न श्रुतं न श्रूयते न श्रोष्यते च डमरुकमिति ।

सूत्रधारः— नूनमेवमेव । परं त्विदमद्भुतम् ।

पारिपार्श्विकः— भाव, किं तदद्भुतम् ?

सूत्रधारः— यत्किल स्वप्ने पञ्चषान्वारान्परमेश्वरेण डमरुकं ग्रन्थयेति नियुक्तः कश्चन कविः ।

पारिपार्श्विकः— (स्वगतम्) भ किल कृतार्थः । (प्रकाशम्) आर्य को नाम स कविः ?

सूत्रधारः—

यस्येशोऽग्रभवः पिता किल महादेवः स काशी प्रभुः
साधुः श्रेयसि सुन्दरी प्रियतमा शाकम्भरी च स्वसा ।
सप्ताष्टोक्तिलिपिप्रभुर्गुणनिधिश्चौण्डाजिबालाजिनः
पौत्रो यो द्वयवादिपङ्कभिहिरो द्वात्रिंशवर्षान्वितः ॥ ३ ॥

पटुषड्भाषाकाव्यं नाटकमाणौ च सट्टकं चम्पूः ।
अन्यापदेशशतकं प्रहसनमपि येन लीलया ग्रथितम् ॥ ४ ॥

अपि च,

सरस्वती घनश्यामो घनश्यामः सरस्वती ।
इत्येव यं प्रति प्रायः किंवदन्ती प्रवर्तते ॥ ५ ॥

यश्च पुनः,

सुरनीरघनश्यामकविकण्ठीरवप्रभुः ।
स्वभुजार्जितसंपच्चिरुपकर्ता विराजते ॥ ६ ॥

अपि च,

बुद्ध्या वर्धितशैवपक्ष निजदोर्दण्डाक्तभाग्योपक्रु-
त्प्रायो वैदिकलौकिकाध्वगतिमन्नष्टप्रबन्धीकर ।
आनन्दाम्बुनिधे त्रियम्बककुलोद्धारैकहेतो कवे
धीर श्रीसुरनारपण्डित घनश्याम त्वमन्यादृशः ॥ ७ ॥

इत्यनुकलं वर्ण्यते सकलजनैः । एवं च रोमाञ्चयन्ति सुन्दरीवचनसुधाबिन्दवः ।

तथा हि,

अये सखि गृहे गृहे श्रुति पुनर्विवाहश्रुतेः
कचाकचि समं धवैर्विदधते चकोरीदृशः ।
अहं तु कवितास्त्रिया मृगितलब्धदृष्टोज्झित-
त्रिलोकवरया स्वयंवृतधवाऽपि नन्दाम्यहो ॥ ८ ॥

पारिपार्श्विकः— किं स महाकविः ? यं प्रति खलु—

वल्मीकात्मजराजशेखरकविश्रीभावभूत्याङ्गिरः-
पुत्रव्यासगुणाढ्यबाणसुकविश्रीभर्तृमेण्ठांशभृत् ।
माहाराष्ट्रकुलेन्दुरेष कवने भोजक्षितिक्षित्कवि-
दिक्पालाष्टकभागभागिव कविः कण्ठीरवो दृश्यते ॥ ९ ॥

अपि चैतन्महत्कुतुकम् ।

ननु प्राप्तः कण्ठीरव इति सघोषे सदसि दु-
ष्कवीन्द्राः श्वक्षुद्रा इव गवयवच्छाङ्किकचयाः ।
श्रुतिघ्नाः सारङ्गा इव गवलवत्तार्किकगणाः
परे मूढाः क्रोडा इव दधति चूडा विमनसः ॥ १० ॥

इति समाकर्ण्यते कर्णपीयूषभूता भणितिः ।

सूत्रधारः— आम् ।

पारिपार्श्विकः— (सानन्दम्) अपि तत्कृतिः यत्किल डमरुकमिति भणितं भावेन ?

सूत्रधारः— को नु खल्वन्यः ?

पारिपार्श्विकः— आर्य, स खलु किमिति निर्माति मुहुर्मुहुर्विविधनिबन्धनानि ?

सूत्रधारः—

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
कर्तव्या बहवो ग्रन्था यद्येकोऽपि प्रथां व्रजेत् ॥ ११ ॥

पारिपार्श्विकः— भाव, काव्यालापांश्च वर्जयेदिति परिभाषन्ते हि मनीषिणः ।

सूत्रधारः— (विहस्य) जयति नाम तत्र कुठारः ।

काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते रूपं विष्णोर्महात्मनः ॥ १२ ॥

इति ।

पारिपार्श्विकः— आर्य, को गुणः कवने ?

सूत्रधारः—

शब्दे निर्णयमादधाति तनुते गोष्ठ्यां प्रतिष्ठां परां
सूते कीर्त्तिमभङ्गुरां रचयति स्वच्छन्दमोदं मनः ।
मानं कंचन दोग्धि मार्ष्टि दुरितं निर्गन्धयत्यल्पतां
कल्पक्ष्मोणिरुहीव साधुकवने को वा गुणो दुर्लभः ॥ १३ ॥

पारिपार्श्विकः— आर्य, स्पर्धन्ते किलानेन केचन दुष्कविहतकाः ।

सूत्रधारः— (सरोषम्) मारिष किमाशुकवनैः, उत सूक्तिविलासैः, किमथवा वश्यवाग्विभवैः, आहोस्विदृष्टप्रबन्धीकरत्वेन, केन वा गुणातिशयेन स्पर्धन्ते ?

पारिपार्श्विकः— (साश्चर्यम्) भाव, अज्ञानातिशयेन ।

सूत्रधारः— साधु सम्यगुक्तम् ।

पारिपार्श्विकः— आर्य, अज्ञाः किमर्थं दूषयन्त्यस्य निबन्धनानि ?

सूत्रधारः— (स्वगतम्) सरस्वतीद्रोहार्थम् । (प्रकाशम्)

निर्यन्नलभ्यसुकवित्वपथेष्विवान्धो
हा दूषयेत कुकविः सुकविप्रबन्धान् ।
आरोहमङ्गलविधौ मनसः प्रसादं
प्रासादसङ्क्रमतिनिन्दति नाम पङ्गुः ॥ १४ ॥

पारिपार्श्विकः— आर्य, विनिन्दन्ति खलु मुहुरस्य कवनं केऽपि दार्भिकाशिरोमणयः छान्दसादयोऽपि ।

सूत्रधारः— (विहस्य)

स्वयं कवित्वाध्वनि गन्तुमन्धो
मन्दो बुधेन्दोस्तदिदं विनिन्देत् ।
अपूतशीला परिपूतशीलं
कुलाङ्गनायाः कुलटाङ्गनेव ॥ १५ ॥

पारिपार्श्विकः— आर्य, तावदिदमास्ताम् । विलक्षणमिदं डमरुकम् ।

सूत्रधारः—

योऽयमेत्य निशि स्वप्ने यदिदेश तदद्भुतम् ।
स जानाति न जानाति न जानाति जनोऽपरः ॥ १६ ॥

अथवा यथा कृतं कविना तथैव लक्षणं देवेनादिष्टमिति स्पष्टमेवैतत् ।

पारिपार्श्विकः— आर्य, नूनमेवमेव भवेत् तथापि न खलु विस्रम्भो दुर्जनानां यत्किल स्वप्नमवतीर्णो देव इति ।

सूत्रधारः— वर्तते नाम कवेरुक्तिरत्रैव विषये ।

पारिपार्श्विकः— कथमिव ?

सूत्रधारः—

भोः सज्जना नतु मृषा कथनैः खलानां
भाग्यानि संप्रति कियन्ति विलुण्ठितानि ।
मन्मानसेन सममत्र शिवोपगूढः
साक्षी शिवो विजयते विजयाधिरूढः ॥ १७ ॥

इति ।

पारिपार्श्विकः— हन्त गर्वोक्तिरपि संशोभते । (विचिन्त्य) आर्य, किमिति न वर्णितस्तेन
निजराज्ञयनिगुम्भविलासः ?

सूत्रधारः— श्रूयतां वर्णित एव भानुदत्तादिभिः ।

पारिपार्श्विकः— किमिति ?

सूत्रधारः—

वाग्देवीकरदण्डघातनलिकक्रीडाविनिर्यत्सुधा-
सारासारमहापरीमलझरीमाधुर्यवेगासहः ।
गम्भीरः सरलो विलेखनविलम्बेन क्षणाकूणनः
श्रीमान्भाति रसोर्मिलः कविघनश्यामस्य वाणीभरः ॥ १८ ॥

इति ।

पारिपार्श्विकः— युज्यते ।

सूत्रधारः— मारिष, कृतं विलम्बेन । अविलम्बेन कलहंसकलकण्ठयोर्वर्णिकामादाय प्राश्निकमानप्रावर्जनाय **राजानुरञ्जनं** प्रक्रमावहे ।

पारिपार्श्विकः— एवमस्तु ।

(इति निष्क्रान्तौ ।)

इति पात्रसूचना ॥

ततः प्रविशतः कलहंसकलकण्ठौ ॥

कलहंसः— (परिक्रम्य) सखे कलकण्ठ, समारभस्व तावदादिमं राजानुरञ्जनं नाम निबन्धनम् ।

कलकण्ठः— (स्वगतम्) सज्जोऽस्मि । (प्रकाशम्)

भ्रातुर्वाहनमुत्क्षिपन्जनयितुः कर्षन्जटाः शुण्डया
दन्ताग्रेण विघट्टयन्गिरितटीमाधावयन्मातरम् ।
गीर्वाणान्भ्रमयन्करेण गगनं पद्भ्यां गणाँल्लोलय-
न्देवः सोऽयमिभाननोऽतिमदभागव्याजमव्यात्स वः ॥ १९ ॥

कलहंसः—

आकल्पं भुवनानि रक्ष सकलक्षोणीन्द्रचूडामणे
कल्पेतालपमतिः कथं नु भवतः स्तुत्यै जनो मानुषः ।
यत्ते सद्गुणमण्डलीकणमपि स्तोतुं जडा लज्जया
लीनाः क्वापि फणीन्द्रजीवकवयोऽप्यायान्ति नैवावनौ ॥ २० ॥

कलकण्ठः—

अयि क्षोणीजाने ननु सहजभावेन भवता
परं धैर्ये दाने यशसि सहनत्वे च विवृते ।
हिमाद्रेर्हेमाद्रेः शिबिधरणिपालस्य धरणे-
स्त्रपा भङ्गोऽसूयाऽवमतिरजनीतीव शृणुमः ॥ २१ ॥

कलहंसः—

ब्रह्मोपेन्द्रशिवास्तु दोषकलिता भूमीपते त्वं तथा
नैवासीति जनोऽखिलो वदति यत्सत्यैव सा भारती ।
यत्र क्वापि पितामहः क्षितितले यच्छ्राद्धसामान्यभुङ्
नित्यं यश्च कलङ्कभृद्द्विभुरसौ यश्चौर्यशीलो हरिः ॥ २२ ॥

कलकण्ठः—

क्षोणीचन्द्र नरेन्द्रहीर भुवने सान्द्रासु ते कीर्त्तिषु
स्नातुं क्षीरनिधिभ्रमात्सुरमुनिव्यूहास्त्वरन्तेतराम् ।
जीवंजीवततिः प्रसारयति च ज्योत्स्नेति पातुं मुखं
कर्पूरभ्रमतश्च खञ्जनदृशो हस्तान्पुरस्तन्वते ॥ २३ ॥

कलहंसः—

देव त्वद्यशसा सिते जगति यज्जातं तदाकर्ण्यतां
चित्रं हंस इति भ्रमाच्छतधृतिः काकोलमारोहति ।
तार्क्ष्यभ्रान्तिवशंवदः समयते गृध्रं विकुण्ठासुतः
कंचित्कर्षति कासरं वृषधिया कण्ठेकलङ्को विभुः ॥ २४ ॥

कलकण्ठः—

त्वत्कीर्त्तिप्रमदा शनैरभिसरत्याशीविषाणां पतिं
तत्संतापभियेव शीतमचलं सङ्केच्छुरालिङ्गति ।
तद्भावक्षुभितेव चुम्बति मृदुं चन्द्रं तदःस्ताङ्कनं
वेगान्माष्टुमिवायते सुरधुनीं शुद्धा तथाऽप्यन्वहम् ॥ २५ ॥

कलहंसः—

क्षोणीचन्द्र दिगङ्गनास्तव महादानाम्बुगङ्गाजलं
स्नाताः सुन्दरकीर्त्तिचन्दनभरैरङ्गे समालम्भनम् ।
पत्रालीं कुचयोः प्रतापलहरीसिन्दूरबृन्दैः क्वचि-
न्पुञ्जाकीर्त्तिमषीभिरञ्जनविधिं नेत्रद्वये तन्वते ॥ २६ ॥

कलकण्ठः—

क्षोणीन्दो शृणु चित्रमा क्षितितलादा चान्तरिक्षात्ततं
नैकं ते विमनायशस्तव यशः प्रेक्ष्य प्रतापं च ते ।

उद्वाहो मम पश्यतो रणसुधा धातुद्वयीपट्टिका(?)
एवं वञ्चयते निलिम्पवनिताजालं जडं नारदः ॥ २७ ॥

कलहंसः—

कुन्देज्यस्मितशम्भुचन्दनबिसक्षीरोदशेषाहिरा-
ण्मुक्तैरावणहंसकैरवसुधाचन्द्रोडुमन्दाकिनीः ।
कीर्त्तिस्तेऽश्नति सूचिभेद्यतिमिरेङ्गालादिकं द्वेष्टि त-
च्छुद्धाशुद्धविवेचने त्वमिव साऽप्युर्वीन्द्र सान्द्रं वपुः ॥ २८

कलकण्ठः-

क्षोणीन्दोर्भवतः प्रतापदहनैर्व्याप्तेऽखिले विष्टपे
भीताहीश्वरकम्पनं कथमसौ देशेषु भूकम्पनम् ।
और्वो दीप्त इति स्वभूरुदधितश्चित्ते सतां लीयते
विन्दन्ते पुटपाकरीतिमृषयो विध्यण्डभाण्डोदरे ॥ २९

कलहंसः— (पुरोऽवलोक्य)

एष जलंधरद्वितीयो विनयंधर इत एवाभिवर्तते तावदावां गच्छावः ॥

इति निष्क्रान्तौ ॥

इति डमरुके निबन्धने प्रथमोऽलंकारः समाप्तः

॥ अथ द्वितीयोऽलंकारः ॥

ततः प्रविशति जलंधरेण सह विनयंधरः ॥

विनयंधरः— सखे आरभ्यतां कलिदूषणं नाम निबन्धनम् ।

जलंधरः—

स्तेयश्येनगणेन धर्मविहगान्निन्दाश्वभिः सच्छशा-
नाशावङ्कुरिकाभिरध्वरकिटीर्न्हिंसाग्निना[1] चिद्वनम् ।
मात्सर्यादिपृथग्जनैरपि सुहृद्भूपादिरङ्कून्हर-
न्मैत्रीं पापकुलेन कश्चन कलिव्याधो विजेजीयते ॥ ३०

विनयंधरः—

ग्रामे न विद्वान्जडता प्रभोश्च विश्वासिनी तस्य च धर्मपत्नी ।
इत्थं यदि स्यादखिलं तदानीं पुरोहितस्तस्य बृहस्पतिः स्यात् ॥ ३१

जलंधरः—

वृद्धता यजमानस्य तत्पत्न्याश्चारु यौवनम् ।
विमर्दश्च गृहे स्याच्चेदाश्रितस्तत्र मन्मथः ॥ ३२ ॥

विनयंधरः—

एकताम्बूलदानेन काचेनैकेन वा पुनः ।
कार्तान्तिकजनोऽह्लाय दासेर इव जायते ॥ ३३ ॥

जलंधरः—

एकादशस्थस्य गुरोः फलानि तद...कारजना लभन्ते ।
यथा धनीन्द्रा घनरोगजालैर्भगंदराद्यैर्विमनीभवन्ति ॥ ३४ ॥

---

1 ...द्रिणा

विनयंधरः—

भूयो रुद्राक्षभस्मानि बहुपात्रप्रसारणम् ।
स्थूलस्फाटिकलिङ्गं चेत्येतद्भिक्षुकलक्षणम् ॥ ३५ ॥

जलंधरः-

एकद्विपणदानेन हृष्टः कवयिता जनः ।
शैलं सिद्धार्थयेदादौ सिद्धार्थं शैलयेत्ततः ॥ ३६

विनयंधरः—

विलेखनादिषु यदि शीतलः प्रभुस्तदाधिकारिकजन एव हि प्रभुः ।
परं त्विहास्ति किमपि सेव्यसेवकाविति त्रुटद्भिमविगलद्गणान्तरम् ॥ ३७ ॥

जलंधरः—

कुण्डलीकरणासक्तो द्विजिह्वो रन्ध्रदक् क्वचित् ।
परभोगग्रहे व्यग्रः पिशुनो भुजगोपमः ॥ ३८ ॥

विनयंधरः—

न क्वापि जीविका येषां येषां चाल्पीयसी मतिः ।
पौराणिकीभूय मुहुर्हिण्डन्ते प्रतिवेश्म ते ॥ ३९ ॥

जलंधरः—

अद्यान्वाधानमद्येष्टिः पशुरद्येति सर्वतः ।
संपादयन्ति स्वमहो बहवः कुक्षिदीक्षिताः ॥ ४० ॥

(नेपथ्याभिमुखमवलोक्य) सखे सुभद्रापतिसोदरौ मन्दारकमकरन्दावायातस्तादितो गन्तव्यम् ॥

इति निष्क्रान्तौ ॥

इति डमरुके निबन्धने द्वितीयोऽलंकारः समाप्तः ॥

।। अथ तृतीयोऽलंकारः ।।

ततः प्रविशतः मन्दारको मकरन्दश्च ।।

मकरन्दः—

सखे किं विलम्ब्यते ? पठ्यतां तावत् सुकविसंजीवनं नाम निबन्धनम

मन्दारकः—

वाणी पातु नखांशुलोहितमहावीणा यदीया रुचि-
त्रिस्रोता वलिवीचिका कुलतटी रोमालिशैवालिनी ।
वक्त्राब्जाऽक्षिझषा नितम्बपुलिना नाभीपुटावर्तिनी
केशालिर्गलशङ्खिनी भुजलतोपेता विदेदीप्यते ।। ४१ ।।

मकरन्दः—

अभिनन्दनमात्रेण स्वकवित्वस्य केवलम् ।
कवयो यस्य कस्यापि वहेरन्हास्यमप्यहो ।। ४२ ।।

मन्दारकः—

कविमातृगृहस्थायाः कवितावालसुभ्रुवः ।
लालनं यद्रसज्ञानामयं क्रीडाविधिर्मतः ।। ४३ ।।

मकरन्दः—

अहो नु कवितावध्वाः स हि तातोऽस्ति शाब्दिकः ।
तार्किको दण्डपाणिः स्यान्कविः संजीवनौषधम् ।। ४४ ।।

मन्दारकः—

कुतौशनसमार्गेषु गन्तुमान्ध्यं भजन्त्यहो ।
दुर्लभे दोषमार्गे तु यावदञ्जनदृष्टिभिः ।। ४५ ।।

25970

मकरन्दः—

स्निह्यति प्राङ्निबन्धेषु स्वापित्रा रचितेष्विव ।
नवग्रन्थश्रुतौ खिन्नो मात्रन्त इव दुर्जनः ॥ ४६ ॥

मन्दारकः—

क्व विहारः क्व चाहारः क्व निद्रा क्वाङ्गनारतिः ।
कवित्वब्रह्मणि परं सुसक्तश्चेन्महाकविः ॥ ४७ ॥

मकरन्दः—

कृतीर्निर्माति विविधाः परं न स्तौति कुत्सये ।
सदा चिन्तयते वाचं सत्कविर्द्रुहिणायते ॥ ४८ ॥

मन्दारकः—

स्थिरीकुर्वन्कृतिख्यातिं सदा वाग्ब्रह्मशीलनात् ।
ब्रह्मीभवति मेदिन्यां महीरत्नं हि सत्कविः ॥ ४९ ॥

मकरन्दः— (आकाशे) शाण्डिल्य! किं ब्रवीषि? कोकिलेन सह पिङ्गलकः समभ्येतीति । भवतु गच्छ। (विचिन्त्य) सखे तदावाभ्यामिह न स्थातव्यम् ॥

इति निष्क्रान्तौ ।

इति डमरुके निबन्धने तृतीयोऽलंकारः समाप्तः ॥

॥ अथ चतुर्थोऽलंकारः ॥

ततः प्रविशतः कोकिलकपिञ्जलकौ ॥

कोकिलकः— कतमं निबन्धनं प्रयोक्तव्यम् ?

पिङ्गलकः— कुकविसंतापनं नाम ।

कोकिलकः— (सानन्दोल्लासम्)

त्र्यश्चमिक्षुधनुर्बीजसिन्दूररुचि सुन्दरम् ।
द्वन्द्वमिन्दुशिरो मञ्चे चञ्चत्किंचिदहं भजे ॥ ५० ॥

पिङ्गलकः—

परस्य पदरत्नानि किंचार्थमतुलं हरन् ।
ज्ञास्यत्यन्य इति त्रस्तो दुष्कविस्तस्करायते ॥ ५१ ॥

कोकिलकः—

न्यस्यत्यग्रे बहून्ग्रन्थानर्थग्राहाय दुष्कविः ।
पृच्छन्तं वञ्चयल्लँोकं शूद्रः कार्तान्तिकायते ॥ ५२

पिङ्गलकः—

तुभ्यं न तिष्ठे हाहेति रुदतीं कविताङ्गनाम् ।
पतिव्रतामिव विटो हठात्कर्षति दुष्कविः ॥ ५३ ॥

कोकिलकः—

लेखिन्यः पञ्चषा द्वित्राः पत्रिका द्वौ मषीघटौ ।
कुकवेः कवमानस्य केवलो डम्भडम्बरः ॥ ५४ ॥

पिङ्गलकः—

हंसेनेव बको मोहात्कवीन्द्रेण कविब्रुवः ।
गण्यते चेदयत्येव साद्रिडम्बनभाण्डताम् ॥ ५५ ॥

कोकिलकः—

द्वारस्थं मां विमुञ्चेति प्रभुं ब्रूहीति तत्प्रियम् ।
तं प्रभुं शंकरोऽसीति कुक्षये स्तौति दुष्कविः ॥ ५६ ॥

पिङ्गलकः—

नामान्तरनिदेशेन श्लोकमेकं कविब्रुवः ।
नानाप्रभुसभारङ्गे वक्ति दुस्तुन्दपूर्तये ॥ ५७ ॥

कोकिलकः—

अधुना कवयामीति चिन्तामभिनयन्क्षणम् ।
पद्यं पूर्वकृतं ब्रूते प्रतिष्ठायै कविब्रुवः ॥ ५८ ॥

पिङ्गलकः—

तुष्यत्यविदिते लोकैः कवित्वान्तरचोरणे ।
ज्ञाते संवाद एवेति मन्दं भणति दुष्कविः ॥ ५९

कोकिलकः—

आत्मनो जडता यत्र तद्यत्नेन विनिन्दति ।
विक्रयाजीवति गिरामलं दुष्कविवाणिजः ॥ ६० ॥

पिङ्गलकः— सखे न सांप्रतमिह स्थातुम् । यन्नेपथ्यार्थप्रविष्टौ कन्दलकसुन्दरकौ

कोकिलकः— तदेहि ।

इति निष्क्रान्तौ

इति डमरुके निबन्धने चतुर्थोऽलंकारः समाप्तः

॥ अथ पञ्चमोऽलंकारः ॥

ततः प्रविशति कन्दलकेनानुगम्यमानः सुन्दरकः ॥

सुन्दरकः— सखे मा विलम्बिष्ठाः । यदभिहितं गुरुपादैरबोधाकरं नाम प्रबन्धमनुसंधत्स्वेति ।

कन्दलकः— (स्वगतम्) साधु युक्तरूपमुक्तम् ।

वयं तत्प्रणतेः कर्मीकुर्महे शर्महेतवे ।
यन्मुखैर्द्वादशाब्जेव भाति काऽपि सभानदी ॥ ६१ ॥

सुन्दरकः—

कीलालवर्णा कृतवर्णवर्णा स्थानं सदा स्थानसरोष्णताका ।
करीरशब्दग्रहपीवरे या वरा परिव्राजकलोचनस्य ॥ ६२ ॥

कन्दलकः—

तान्पाण्डुरस्याघवहान्निहन्तु झषक्षितिक्षित्पुटभेदनान्तम् ।
बिभ्रत्पुरः शब्दगृहं सशङ्खश्चक्रे समीपं धृतचक्रसूनुः ॥ ६३

सुन्दरकः—

भूभूपतिः प्राक् शिशिरोऽथ कृष्णो मयूरसाष्टापदसिंहजुष्टम् ।
स्वपुत्रमात्रे युधि संजहार चाणूरजिन्पूर्वजजिष्णुतातम् ॥ ६४

कन्दलकः—

पात्रपत्रा निहन्त्वप योंष्माकीणमघाकरम् ।
सिन्धुमित्रप्रसूभर्तृकन्यापत्यङ्गजानुजः ॥ ६५

सुन्दरकः—

अनयानो घटश्रोत्रदायादो बलवान्घटः ।
हन्तुं शालावृकान्प्रापदल्पकुक्षिप्रियाज्ञया ॥ ६६ ॥

कन्दलकः—

अयं मामभ्यवहरेच्चक्रीत्येष प्लवंगमः ।
औतुजेमनब.....नां क्षयनिर्व्याधनं गतः ॥ ६७

सुन्दरकः—

घनध्वनिखगध्वस्ताः सहपङ्क्तिशताङ्गजाः ।
सालावृकादरपराः परावृतिरेतराम् ॥ ६८ ॥

कन्दलकः—

नीलबाहुगदाक्रान्ता दुःखमण्डचतुष्टये ।
आत...तानि कायस्था पूतना मता ॥ ६९ ॥

सुन्दरकः—

अजादक्षेक्षणापीडः पीडां पीडयतां स वः ।
शुचिभूश्रृङ्गिसूनुद्विद्विजास्या यमुपासते ॥ ७० ॥

कन्दलकः—

सद्यः खण्डयतां देवी शिवास्माकारिमण्डलम् ।
...दुग्धधरं यस्या गौरनेत्रो महा नमः ॥ ७१ ॥

(नेपथ्ये कलकलः)

सुन्दरकः— (विलोक्य) सखे कपिञ्जलमञ्जुलकौ प्रहृष्टौ कुतोऽपि चिरमिहागच्छतः । तदिहस्थौ न भवावः ॥

इति निष्क्रान्तौ ॥

इति डमरुके निबन्धने पञ्चमोऽलंकारः समाप्तः ॥

॥ अथ षष्ठोऽलंकारः ॥

ततः प्रविशतः कपिञ्जलमञ्जुलकौ ॥

कपिञ्जलः— (सानन्दम्) सखे मञ्जुलक! अपि सत्यं सामाजिकप्रार्थनं शाब्दिकभञ्जनं नाम निबन्धनं प्रयुज्यतामिति ?

मञ्जुलकः— सत्यम्।

कपिञ्जलः— (स्वगतम्) कुतः पुनर्विलम्बनम् । (प्रकाशम्)

जयत्यञ्जनसिन्दूरसुन्दराङ्गं महन्महः ।
विजानन्ति जना यत्र यमुनाशोणसंगमम् ॥ ७२ ॥

मञ्जुलकः—

मान्यभीष्मकृपाऽऽलीढो भीमधर्मपरिव्रतः ।
दीर्घपृष्ठादितः कामं विजयत्येष धूर्जटिः ॥ ७३ ॥

कपिञ्जलः—

आनन्दनिधिरव्याजं भवमानः प्रकाशताम् ।
समस्तगुणसाधीयानामोदत्येष सज्जनः ॥ ७४ ॥

मञ्जुलकः—

वन्यं भक्षति पीयतेऽच्छमपगानीरं पथा साधुना
स्वैरं संचरते न जातु लजते नग्नोऽपि नान्यं स्तुते ।
नो वा संशृणुते न वा वचति नो संपश्यते नेहते
कुञ्जे विश्रमते तदेष सुमतिः शङ्केऽद्य रङ्क्ष्यते ॥ ७५ ॥

कपिञ्जलः—

खिन्ने किंचिदिव खिन्ने नितान्तं छिन्ने धैर्यं जातु भिन्ने न माति ।
जृम्भत्युत्कण्ठत्यनुत्तिष्ठमाना नार्या भाजत्यूररीकुर्वतस्तम् ॥ ७६ ॥

मञ्जुलकः—

पश्य ज्ञानोऽत्र संक्रीडत्येत क्रोडत्ययं गुणः ।
घूर्णन् जायति शूद्रोऽयं जीर्यते वधुमण्यसौ ॥ ७७ ॥

कपिञ्जलः—

स्नायति यस्त्वयि सोऽद्य क्षिपते बिभृतेऽभिलषते ।
नुदते यमर्गायममति क्षिप्यति भरते सह गङ्गे ॥ ७८ ॥

मञ्जुलकः—

शुभिसंबन्धमाबिभ्रत्पुरा द्विजगणाश्रितः ।
अमृष्यमाणश्छेत्तारं स्वयमेधति सज्जनः ॥ ७९ ॥

कपिञ्जलः—

ईश्वरे देवि तेजे न महता धर्ममाचरे ।
पदो रजः प्रार्थयते क्लिश्यते मे न दित्ससे ॥ ८० ॥

मञ्जुलकः—

धेनुश्रियै द्रोणदुघा प्रसूयते विश्राममुज्झन्कवते मुदे कविः ।
आर्यै निचायन् विट आनुते वधूं संतिष्ठते शीलगुणाय दुर्यशः ॥ ८१ ॥

(नेपथ्ये)

हरिदासमणिवर्माणौ क पुनरतुच्छया मुदा गच्छतः । (पुनस्तत्रैव) पण्डितखण्डनं नाम निबन्धनमभिनेतुं रङ्गमण्डपं प्रति गच्छावः ॥

कपिञ्जलः— सखे तत्त्वूर्णमाव्रज ।

इति निष्क्रान्तौ ॥

इति डमरुके निबन्धने षष्ठोऽलंकारः समाप्तः ॥

॥ अथ सप्तमोऽलंकारः ॥

ततः प्रविशति हरिदासेन सह मणिवर्मा ॥

मणिवर्मा—

गौरंजामातर तात गौरंजामातर पुनः ।
वन्दे मन्देतरानन्दवृन्दतुन्दिलमानसः ॥ ८२ ॥

हरिदासः—

निर्णेनेक्तितरामेषा मनीषां ब्रह्मवान्दिता ।
वीणावादपरा साध्वी शंभुपत्नी सरस्वती ॥ ८३ ॥

मणिवर्मा—

जातु सायकनिपातितध्वनद्दुर्दशारिदशकंधरः सुधीः ।
राम एष परिचुम्बति स्म तां रेवतीं परवधूपराङ्मुखः ॥ ८४ ॥

हरिदासः—

हरिप्रिया महालक्ष्मी रोहिणीव हरिं मुदा ।
आगच्छन्ती पतिं शुक्रं विवेवेत्ति सदा तदा ॥ ८५

मणिवर्मा—

दैवादलाभेन सुलोचनानां तारुण्यपुण्यो भृशमुन्मदिष्णुः ।
समीपभूतिष्ठदयत्नवश्यगौरीकुचौ पीडयते कुमारः ॥ ८६ ॥

हरिदासः—

वनान्नगरमभ्येत्य पापशङ्कां परित्यजन् ।
सुमित्रालिङ्गनं चक्रे लक्ष्मणः काममोहितः ॥ ८७ ॥

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE,
डमरुकम् 64, R. H ROAD, MADRAS-4 २१

मणिवर्मा—

विदन्नपि कथं लसद्रसतरङ्गिणीमूर्मिळां
जगाम रघुनन्दनः सपदि शृङ्गबेरे पुरे ।
इति प्रकटमन्युमान्भरत एष संकेतयन्
सहद्भिराधिजाङ्गलं निशि हठेन सीतामगात् ॥ ८८ ॥

हरिदासः—

निष्कलङ्कं भृशोष्णांशु चन्द्र वक्षोजकुम्भयोः ।
या वा विरहिणी यत्ते सा सुख्यति न दुःख्यति ॥ ८९

मणिवर्मा—

गोस्वामी स्वयमीशानो विधवानन्दनोऽच्युतः ।
गोस्वामिविधवानां तद्वृषाकप्योरिवैकता ॥ ९० ॥

हरिदासः—

सहेलं व्योमनि निशामपमाने शिशौ बुधे ।
रोहिणीं चन्द्ररहितां चुम्बति स्म विरोचनः ॥ ९१ ॥

मणिवर्मा—

रावणिः समरे जातु कुण्ठासु शरपालिषु ।
पौलस्त्यं स्वगुरुं हन्तुं पिनाकं महदक्षिपत् ॥ ९२

हरिदासः— (नेपथ्याभिमुखमवलोक्य) भो बहुवसुयायावरौ न चिरमागच्छतम् । आवाभ्यां पुनर्विलम्ब्यते ।

इति मणिवर्मणा सह निष्क्रान्तः ॥

इति डमरुके निबन्धने सप्तमोऽलंकारः समाप्तः

॥ अथ अष्टमोऽलंकारः ॥

ततः प्रविशति बहुवसुना सह यायावरः ॥

यायावरः—

सखे बहुवसो ! अपि संप्रकाश्यते जातिसंतर्जनं नाम निबन्धनम् ।

बहुवसुः— (स्वगतम्) कः संदेहः (प्रकाशम् अञ्जलिं घटयन्)

नव्ये सङ्गमहोत्सवे शयनतो भीता दृशोर्युग्मतो
व्रीणा नाभिसरोजतः प्रविनता वक्षोजयोः कूणिता ।
हे सुभ्रूः किमु वैकृतैरिति जवात्पत्या मुदालिङ्गिता
देवी मङ्गलदेवता दिशतु वः स्वाख्यादिमार्धं मुहुः ॥ ९३ ॥

यायावरः—

नाज्ञान् मानान् पेर्यतम्बिरप्पाकुट्टिश्च मूत्तवन् ।
वेङ्गडं नल्लतम्बिश्च रज्जुग्रथनकर्मणा ॥ ९४ ॥

प्रातः पर्युषितं भुक्त्वा रज्जुग्रथनकर्मणा ।
महिषीक्षालनेनापि क्षिपन्ति द्रविडा वयः ॥ ९५

यायावरः-

अहो द्राविड गेहेषु पितुः श्राद्धेऽन्यभोजनम् ।
सूपाज्ये रथरथ्यां दीपो दीपावलीमहे ॥ ९६ ॥

बहुवसुः—

करीषकृतये व्रीहिवितुषीकरणाय च ।
निर्ममो निर्मिमीते स दुर्विधिर्द्रविडाङ्गनाः ॥ ९७

यायावरः—

महाराष्ट्रा जडा यत्तैः प्रमादो यत्न इत्यहो ।
भणितावप्रमादोऽयमयत्नमिति भण्यते ॥ ९८ ॥

(प्रविश्य पटाक्षेपेण)

दर्दुरिका— अज्जा एसो खु सुणेमी आअच्छइ ।

उभौ—

हन्त शरणमेव शरणयावः ॥

(इति निष्क्रान्ताः सर्वे ॥)

इति डमरुके निबन्धने अष्टमोऽलंकारः समाप्तः

॥ अथ नवमोऽलंकारः ॥

ततः प्रविशति सुनेमिः ॥

सुनेमिः— (आकाशे) सखे शिवदत्त, कुतः पुनर्विलम्बसे ? तदेहि तावत्प्रभुत्वं नाम निबन्धः मुपक्रमावहे ।

(प्रविश्य)

शिवदत्तः— (सहर्षोल्लासं शिरसि करावर्तंसयन्)

वासश्चर्म रथो वृषः प्रियतमाऽपर्णैकदन्तः सुतो
ज्येष्ठोऽन्यस्तु विशाख इत्यभिजनो (हस्ते) कपर्दो धनम् ।
नो मातापितरौ गृहं महिधरो भस्माङ्गरागो महा-
नित्थं सर्वदरिद्रमीश्वरमहो लक्ष्म्यै भजामो वयम् ॥ १०४ ॥

सुनेमिः—

असत्यं सेवनं पित्रोर्हिंसां यात्राकृतिं पराम् ।
स्वर्णस्तेयं तपो घोरं प्रभवो हृदि जानते ॥ १०५ ॥

शिवदत्तः—

परद्रव्यं परं धर्मं परानिन्दां परां मतिम् ।
परनारीं परं ब्रह्म प्रभवो ननु मन्वते ॥ १०६ ॥

सुनेमिः—

मुखे विद्याऽस्ति नो भूमिर्मग्ना न च महोदधौ ।
न मृताः प्रभवश्चान्ये कुतो गर्वायसे प्रभो ॥ १०७ ॥

शिवदत्तः—

शिविकार्वरथेभाद्यैर्धरन्तां प्रभवो मुदम् ।
स्वान्ते यद्यनुमास्यन्ति स्वान्ते पुण्यैनसी इव ॥ १०८ ॥

सुनेमिः—

कुञ्जराद्यासिकाजालैर्हन्त न प्रभवोऽधिकाः ।
मर्कटा नारिकेळेषु वसन्तीति किमुन्नताः ॥ १०९ ॥

शिवदत्तः—

याचको याचते लक्ष्मीं यत्किंचिद्वसु न प्रभून् ।
अन्यथा गतलक्ष्मीकान्किं न याचति तत्स तान् ॥ ११० ॥

सुनेमिः—

प्रभूणां जाड्यवत्सिद्धं मोहमूहामहे वयम् ।
तदप्यहो न जानीमः क्वास्ति वा भाग्यरेखिका ॥ १११ ॥

शिवदत्तः—

परेभ्यो मतिसत्कर्मदयास्वप्रमदादिकम् ।
प्रभवो...प्रेयः प्रभवो नास्ति को गुणः ॥ ११२ ॥

सुनेमिः— (परिवृत्यावलोक्य) किमेष ककुन्दर इत एवाभिवर्तते ।

(प्रविश्य)

ककुन्दरः— (शिवदत्तस्य कर्णे एवमेव)

शिवदत्तः— अपि सत्यमुदरंभरिः श्वेतद्वीपादागतः ?

ककुन्दरः— अलमलीकाशङ्कया । भवतु ; गच्छ त्वम् ।

शिवदत्तः— भवतु गच्छ त्वम् ।

ककुन्दरः— तथा । इति निष्क्रान्तः ।

सुनेमिः— किं कारणमिहावयोरवस्थाने ।

शिवदत्तः— तदेहि गच्छावः । सख्युरुदरंभरेः वैभवं प्रत्यक्षीकुर्वः ।

इति निष्क्रान्तौ ॥

इति डमरुके निबन्धने नवमोऽलंकारः समाप्तः ॥

॥ अथ दशमोऽलंकारः ॥

(नेपथ्ये)

भो भो जितेन्द्रियसुकर्मसुमेधसः, तूर्णमाव्रजतनिबन्धनमभियोक्तुमखण्डानन्दनाभिधानम् ।

(ततः प्रविशति सुकर्मसुमेधोभ्यां तृतीयो जितेन्द्रियः ।)

जितेन्द्रियः-- (प्राञ्जलिः सानन्दविनयम् ।)

पत्नीविषे सुतझषे विषयानलेऽस्मिन्
तृष्णाजवे भवसरस्वति मग्नजन्तोः ।
आलम्बरज्जुरिव यस्य पदं चकास्ति
निःश्रेयसाय नरसिंहमुपास्महे तम् ॥ ११३ ॥

सुकर्मा—

स्वरो दधातु नीचतामुपैतु मांसमल्पता-
मसृश्चि यान्त्वदृश्यतां कलेबरं विशुष्यतु ।
वितस्तिमात्रमङ्गमस्य पूर्तये नराधमा-
न्न लक्षयाम्यहं दृशः स्तवस्य वा हृदोऽथ वा ॥ ११४ ॥

सुमेधाः—

पुत्रो रोदितु संप्रदर्श्य जठरं तातान्नमित्यन्वहं
भार्या मूर्ख दरिद्रपुंगव गृहाद्गच्छेति संक्रुध्यतु ।
इन्द्रोऽसि हुहिणोऽसि विष्णुरसि भोः शर्वोऽसि साक्षादिति
स्तुत्वा कंचन पामरं न च वयं याचामहे काञ्चनम् ॥ ११५ ॥

जितेन्द्रियः

विहिंसानिद्राशाभरपिशुनता बिभ्रति जनाः
स्वकीयप्रादेशप्रमितजठरापूरणकृते ।
अपास्येदं सर्वं परमपदलाभाय न हि को-
ऽप्यसारे संसारे शरणयति कंसारिचरणम् ॥ ११६ ॥

सुकर्मा—

मुहुः स्नातुं पुण्या विविधसरितो धर्तुममला-
स्त्वचो भोक्तुं कन्दादिकमनुचरा बालहरिणाः ।
इतीदं निर्याञ्चं सकलमपि क्लप्तं ननु तथा-
ऽप्यरण्यं दुर्जन्तुर्जगति न शरण्यं कलयति ॥ ११७ ॥

सुमेधाः-

अङ्गादङ्गान्नवनवाः स्वेदा इव सुतादयः ।
उत्पद्यन्ते विपद्यन्ते मुधा मुह्यन्ति जन्तवः ॥ ११८ ॥

जितेन्द्रियः—

विषयानुशन्ति यावत्सत्त्वास्ताम्यन्ति हन्त ते तावत् ।
यावद्विजुगुप्सन्ते तेभ्यस्तावत्सुखं प्रमोदन्ते ॥ ११९ ॥

सुमेधाः—

श्रुती निजगुणग्रहे न चतुरे दृशौ मन्दिते
रदा नियतिताः शिरः पलितदुःस्थिरं कम्पते ।
गतागतजडे पदे शिथिलसन्धिबन्धं वपु-
श्च्युतं पिशितमप्यहो तदपि लेढि भोगं जनः ॥ १२० ॥

उष्णीषं वरकञ्चुकं दृढतरं पादत्रमूर्ध्वांशुकं
बिभ्राणो रविभानुभिर्दृढतरं विद्धं मुखं लम्भयन् ।
जन्तुर्दास्यति किंचिदेप इति दुर्मत्या मुहुः सेवते
किं तु ब्रह्मपदाधिरोहणविधौ पङ्गुत्वमालम्बते ॥ १२१ ॥

जितेन्द्रियः-

भ्राताऽम्बा जनकः स्वसा प्रियतमा पुत्रः कुमारी धनं
गेहं गौरिति तत्र तत्र ममतां मूढो विधत्ते मुधा ।

भीमेनासुखदायिना परमभौमेनाध्वना यास्यतः
क्वापि प्रश्रयणक्षमेषु कतमद्वस्तु स्वतः स्थास्यति ॥ १२२ ॥

सुकर्मा— भ्रातः सज्जन नैकजन्ममृतिभिः खिन्नोऽसि तच्छ्रूयतां
धर्माधर्मसुखासुखानि विजहत्ताटस्थ्यमासादयन् ।
त्वंकारोक्तिविनाशपूर्वकमिमं लोकं स्वमालोकय-
न्ब्रह्मैवाहमिति स्थिरात्मविषयामेकां मनीषां धर ॥ १२३ ॥

सुमेधाः— (आकाशे) भोःसामाजिकाः, किं नु वो भूयः प्रियमुपहर्तव्यम् । किं ब्रूथ ? इतोऽपि किमन्यत्प्रियमस्तीति । तथाऽपीदमस्तु भरतवाक्यम्—

दुर्भिक्षेण समं लोके प्रमीलन्त्वसुमेधसः ।
सुभिक्षेण सह प्रायः संभवन्तु सुमेधसः ॥ १२४ ॥

अपि च

दक्षश्चेत्कवितां करोतु विततां देवी दयार्द्रा गिरां
कृत्युल्लासितसाधवे सुकवये मा दुष्कविर्द्रुह्यतु ।
द्वे नाड्याविदमाहितं डमरुकं शंभोर्गिरा जृम्भतां
जीयाच्च प्रवचा महाकविरसावष्टप्रबन्धीकरः ॥ १२५ ॥

इति निष्क्रान्ताः सर्वे ॥

इति डमरुकं समाप्तम् ॥

॥ डमरुकव्याख्यानम् ॥

श्रीमच्चन्द्रशेखरप्रणीतम् ।

श्रीमत्कामेश्वरं देवं देवीं कामेश्वरीं पुनः ।
पितरं शब्दशेषं च वाञ्छापूर्त्यै नमाम्यहम् ॥ १ ॥

घनश्यामस्य सुमहाकविशब्दजुषः कृतेः ।
कुर्यां डमरुकस्याहं टिप्पणं चन्द्रशेखरः ॥ २ ॥

जामातृशोधमत्राकुर्वद्भिर्धातुविस्तराद्यखिलम् ।
डमरुकचित्रावल्यां ज्ञेयं मत्तातपादरचितायाम् ॥ ३ ॥

१. अथ कविर्ग्रन्थपूर्त्यै विघ्नघ्नं मङ्गलं करोति— यस्येति । महसः अर्धनारीश्वरस्य ।

२. क्रोडितः आलिङ्गितः । निर्वाहकः निर्वहणकारी, सूत्रधार इति यावत् ।

७. अस्मिन् पद्ये 'वर्धितशैवपक्ष' इत्यादीनि संबोधनानि विरुदप्रायाणि ।

९. भावभूतिः भवभूतिः । अङ्गिरःपुत्रो बृहस्पतिः । गुणाढ्यः क्षेमेन्द्रः । भर्तृमेण्ठः कालिदासः । दक्षते प्रगल्भते ।

१०. गवला महिषाः । पीयूषोऽभिनवं पयः ।

१२. काव्यालापाश्चेति । श्लोकोऽयं विष्णुपुराणस्थः ॥
देशरूपं समञ्जसम् । दार्भिकाः पशवः, सदसद्ज्ञानिन इति यावत् ।

१८. आकूणनमुत्कण्ठनम् ।
पात्रसूचना, प्रस्तावनेति व्यज्यते ।

२२. पितामहः पितृपिता, ब्रह्मा च । विधुश्चन्द्रः विष्णुश्च । हरश्चोरः, महेश्वरश्च ।

२४. शतधृतिर्ब्रह्मा । काकोलं काकम् । विकुण्ठासुतो विष्णुः ।

२५. अङ्कनं कलङ्कम् ।

२७. ततं विस्तृतम् । सुधां चूर्णम् । धातुः रक्तमनःशिला ।

२८. चन्द्रः कर्पूरम् ।

२९. स्वभूर्विष्णुः ।

३०. पृथग्जनैः चण्डालैः ।

३३. दासेरो भृत्यः ।

३४. अगदङ्कारो वैद्यः । भगन्दरो रोगविशेषः ।

३५. पात्राण्युपकरणानि ।

३६. सिद्धार्थः सर्षपविशेषः ।

३७. शीतको मन्दः ।

३८. भोगः सुखं फणा च ।

४१. विस्रोताः गङ्गा ।
[1]ईशः परमेश्वरः ।

४६. प्राङ्निबन्धेषु प्राचीनप्रबन्धेषु ; खिन्ते खिद्यते ।

५४. कवमानस्य कवयतः ।
सांप्रतं युक्तम् ।

६१. त्रयं पार्वतीपञ्चवक्त्रषण्मुखत्रयम् ।

६२. कीलालवर्णा रक्तकान्तिः [2]कुगवर्णवर्णस्थानं भूगामिचातुर्वर्ण्यस्तोत्रपात्रम् । सदास्थानसदोष्णतर्का सत्सभानित्यचतुरतर्कशास्त्रा । [3]करीरशब्दग्रहः कुम्भकर्णः । लोलचक्षुः, स्त्रीत्यर्थः ।

---

1. एतत्पदघटितः श्लोकः मूलमातृकायां नोपलभ्यते ।

2. 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाऽक्षरे' इत्यमरः ।

3. 'वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना' इति कोशात् करीरशब्दो घटपर्यायकुम्भवाची । शब्दग्रहशब्दश्च श्रोत्रपर्यायकर्णवाची । अतश्च करीरशब्दग्रह इति संघातो रावणानुजकुम्भकर्णे कथंचिल्लभ्यते ।

६३. पाण्डुरस्य पाण्डोः । आत्मरुहानात्मजान् । झषक्षितिक्षिद्विराटः । पुटभेदनं पुरम् । शब्दगृहं कर्णम् । सशङ्कः शल्यसहितः । धृतचक्रो धृतराष्ट्रः ।

६४. भूभूः सीता । सुशिरोधिः सुग्रीवः । कृष्णो नीलः । केयूरसाष्टापदसिंहजुष्टः अङ्गदस-शरभकेसरिसेवितः । स्वपुत्रमात्रे पत्न्यै । चाणूरजित्पूर्वजजिष्णुरिन्द्रजित्, तस्य तातं रावणम् ।

६५. पत्रिपत्रो गरुडवाहनः । 'पत्रं स्याद्वाहनेऽपि च' इति केशवः । अघाकरं पापपुञ्जम् । सिन्धुमित्रं मैनाकः, तत्प्रसूर्मेना, तद्भर्ता हिमवान्, तत्कन्या गौरी, तत्पतिः शिवः, तदङ्गनानुजः तच्छ्यालः ।

६६. अनयानः, सयान इति यावत् । घटश्रोत्रदायादः कुम्भकर्णसुतः ; घटः कुम्भः । शालावृकान् कपीन् । अल्पकुक्षिप्रियो मन्दोदरीपतिः ।

६७. अभ्यवहरेद्भक्षयेत् । चक्री सर्पः । प्लवंगमो मण्डूकः । [1]ओतुजेमनवस्तूनां मार्जार-खादनपदार्थानाम्, मूषिकाणामिति यावत् । क्षयनिर्व्ययनं वासाबिलम् ।

६८. घनध्वनिखगाः मेघनादशराः । पञ्चशताक्षो दशरथः । सालावृकाः कपयः । दरो भयम् ।

६९. नीलः कृष्णः । अन्धका यादवाः । अहन्तानिकायस्था गर्वाधिक्यस्थिता ।

७०. अजादक्षेक्षणं विष्णुवामलोचनम् । चन्द्र इति यावत् । शुचिभूः स्कन्दः । शृङ्गिसूनुर्गिरिजा । द्विद्विजास्यो द्विरदमुखः ।

७१. मा लक्ष्मीः । शिवा शुभा । दुग्धधरं पयोधरम् । गौरनेत्रः पीताम्बरः । 'नेत्रं लोचन-वस्त्रयोः' इति वामनः । महाममः महान् ममशब्दो यस्य स तथोक्तः । वत्सल इति यावत् ।

७२. भीष्मो भीषणः, भीष्माचार्यश्च । कृपा दया । अन्यत्र कृपः कृपाचार्यः । भीमधर्मः । भयंकरधनुः । अन्यत्र (भीमधर्मौ ?) भीमसेनयुधिष्ठिरौ । दीर्घपृष्ठाः सर्पाः । अन्यत्र (दीर्घपृष्ठं) ; दीर्घं पृष्ठम् । कामं मन्मथं, यथेप्सितं च । विजयति अर्जुनवदाचरतीत्यर्थः ।

७४. भवमानः अधिगच्छन् । प्रकाशतामतिप्रासिद्धताम् । आमोदत्यामोदवदाचरतीत्यर्थः ।

७५. पीयते पिबति । लजते लज्जते । वचति वदति । विश्रमते विश्राम्यति । रङ्कूयते हरिणायते ।

---

1. 'आद्यिकस्तु भोजनम् । जेमनं तेह आहारः' इत्यमरः ।

७६. अनुत्तिष्ठमाना अचेष्टमाना । ऊररीकुर्वन्नङ्गीकुरु ।

[1]संपृच्छते विचारयति, आपृच्छते । राजं राजानम् । अध्येति स्मरति । इदं, प्रसिद्धमित्यर्थः । तिष्ठमानः, आत्मानं प्रकाशयन्नित्यर्थः ।

७७. ज्ञेति बुधं प्रति संबोधनम् । अनः शकटम् । संक्रीडति कूजति । गुणो रज्जुः । जायति क्षीयते । वधुमणी स्त्रीरत्नम् ।

७८. स्नायति स्नाति । क्षिपते त्यजति । भरते बिभर्ति ।

७९. शुचिः पूतः, अग्निश्च । द्विजा ब्राह्मणाः, पक्षिणश्च । अ इति संबोधनम् । सदं सदा । एधति एधवदाचरतीत्यर्थः । ' इन्धनं त्वेध इध्ममेधः समित् स्त्रियाम् ' इत्यमरः ।

८०. ईश्वरे इति पार्वतीं प्रति संबोधनम् । ते तव । अजेन शिवेन । पत् चरणम् । प्रार्थयते याचमानाय । क्लिश्यते खिद्यमानाय ।

८१. प्रसूयते प्रसूते । निचायन् पश्यन् । आनुते उत्कण्ठते । संतिष्ठते नश्यति ।

८२. गिरिजामातरं शंकरम् ।

८३. निर्णेनेक्तितरां भृशं शोधयति । ब्रह्माणो ब्राह्मणाः । शंभुर्ब्रह्मा । ' शंभू ब्रह्मत्रिलोचनौ ' इत्यमरः ।

८४. दुर्दशारिदशकन्धर इति । दुष्टा ये दशारयस्तेषां दश कन्धरा (यस्य) इत्यर्थः । रामो बलरामः ।

८५. हरीप्रिया इन्द्राणी । महालक्ष्मीरधिककान्तिः । हरिं चन्द्रम् ।

८६. पुण्यो मनोज्ञः । गौरी संनिहितार्तवा कन्या । कुमारो युवराजः ।

८७. सुमित्रालिङ्गनं सुवयस्यपरिष्वङ्गम् ।

८८. लसद्रसतरङ्गिणी शृङ्गारकल्लोलिनी, गङ्गा च । ऊर्मिलां लक्ष्मणपत्नीं वीचीजटिलां च । मन्युः क्रोधो दैन्यं च । सीतां रामपत्नीं लाङ्गलपद्धतिं च ।

८९. उष्णांशुं चतुरकान्तिम् । चन्द्रं कर्पूरम् ।

---

1. व्याख्यादर्शनेन मन्थस्थः कश्चन श्लोकोऽत्र आदर्शप्राचीनमूलपुस्तके त्रुटितः प्रादिलिखूयते ॥

९०. गोस्वामिसुतः वृषभपार्थिवः। 'पार्थिवे तनये सुतः' इत्यमरः। देवराजस्तु—गौर्मयूरः, तत्स्वामी षण्मुखः, स सुतो यस्य स तथोक्त इति व्याचकार। विधवः पक्षिपतिः गरुड इति यावत्। वृषाकप्योरिव हरविष्ण्वोरिव।

९१. निशामयमाने पश्यति। चन्द्ररहितां कर्पूरवियुक्ताम्। विरोचनश्चन्द्रः॥

९२. पौलस्त्यं रावणं कुबेरं च। पिनाकं शिवधनुः शूलं च।

९३. शयनतः शेषात्। दृशोश्चन्द्रसूर्ययोः। नाभिसरोजतः ब्रह्मणः। वक्षोमणेः कौस्तुभात्। स्वाख्यादिमार्धं, मङ्गलमित्यर्थः।

आर्यावेष (आर्यौ! एष) खलु सुनेमिरागच्छति।

शरणं गृहम्।

१०५. पशोः उपाकृतिं कृतावभिमन्त्र्य हनसम्।

[1]बृहतिका वस्त्रविशेषः।

१०८. स्वान्ते स्वविनाशे। स्वमात्मानम्।

११२. स्वप्रमदाः धनहर्षाः, निजाङ्गनाश्च।

चक्षूकरिष्यावः द्रक्ष्यावः।

११३. ०आजवंजवसरस्वति संसारसागरे।

[2]प्लीहा इति रोगविशेषः

११९. उच्चन्ति इच्छन्ति।

१२०. निजगुणः शब्दः।

१२५. आहितं रचितम्। प्रवचा वश्यवचाः। स्वाधीनसरस्वतीक इति यावत्।

संपूर्णमिदं डमरुकव्याख्यानम्

---

1. एतत्पदघटितं पद्यं वाक्यं वा मातृकायां नोपलभ्यते

2. इदं पदं मूले न दृश्यते।

CORRECTIONS AND ADDITIONS.

The Text of the Damarukam was reconstructed from the only Manuscript available in the Government Oriental Manuscripts Library, Madras. When the text had been printed, a commentary on the text, called Damarukavyakhyanam by Candrasekhara became available from the Tanjore Palace Library. The Commentator, a son of the author, has been very useful in preserving correct readings where the Original Text had many lacunae. The following additions and corrections based on the commentary will be found to be very useful and instructive. The commentary is also printed *in Extenso* after the Text.

Page	1.	L.	11	For	क्रीडितो	read	क्रोडितो
,,	3.	,,	14	,,	भावभूत्याङ्गिरः	,,	भावभूत्याङ्गिरः
,,	,,	,,	17	,,	दृश्यते	,,	दक्षते
,,	5.	,,	3	,,	सम्यगुक्तम्	,,	देशरूपमुक्तम्
,,	7	,,	7	,,	गगनं	,,	गगने
,,	,,	,,	23	,,	विभु	,,	बिधु
,,	,,	,,	,,	,,	हरिः	,,	हरः
,,	9	,,	8	,,	वपुः	,,	पटुः
,,	10	,,	19	,,	तद...कारजना	,,	तदागदङ्कारजना
,,	11	,,	9	,,	शीतलः	,,	शीतकः
,,	12	,,	7	,,	कुलतटी	,,	कुचतटी
,,	13	,,	4	,,	खिन्नो	,,	खिन्ते
,,	14	,,	3	Read	सखे !	before	कतमं
,,	16	,,	5	For	वयं	read	त्रयं
,,	,,	,,	8	,,	कृत...तक	,,	कुगवर्णवर्णस्थानं सदास्थानसदोष्णतर्को
,,	,,	,,	9	,,	०लोचनस्य	,,	०लोलचक्षुः
,,	,,	,,	11	,,	पाण्डुरस्याघवहान्...	,,	पाण्डुरस्यात्मरुहान्निहन्तुं
,,	,,	,,	14	,,	शिखिरोऽथ...	,,	सुशिरोपि कृष्णकेयूरसाष्टपद-सिंहजुष्टः

Page	16	L.	18	For	०त्यङ्गजानुजः	read	०त्यङ्गनानुजः
,,	17	,,	4	Re-read as	ओतुजेमनवस्तूनां क्षयनिर्व्यथनं गतः ।		
,,	,,	,,	7	For	सालावृकादरपराः	read	सालावृका दरपराः
,,	,,	,,	9	,,	मण्डचतुष्टये	,,	मन्धकतुष्टये
,,	,,	,,	10	Re-read	आत्ताहंतानिकायस्था वनिता पूतना गता		
,,	,,	,,	15	,,	सद्यः	,,	माऽद्य
,,	,,	,,	16	,,	...	,,	वीक्ष्य
,,	,,	,,	,,	,,	महा नमः	,,	महामम:
,,	18	,,	10	,,	भीमधर्मपरिव्रतः	,,	भीमधर्मपरीवृतः
,,	,,	,,	11	,,	दीर्घपृष्ठादिकः	,,	दीर्घपृष्ठाञ्चितः
,,	,,	,,	21	Re-read as			

विन्ते किंचिन्नैव खिन्ते नितान्तं छिन्ते धैर्यं जातु भिन्ते न भाति ॥

,,	,,	,,	22	For	भाजति	read	भ्राजति
,,	19	,,	9	,,	शुभि	,,	शुचि
,,	,,	,,	10	,,	अमृष्यमाणः	,,	अ मृष्यमाणः
,,	,,	,,	,,	,,	स्वयमे०	,,	सदमे०
,,	,,	,,	12	,,	तेजे न	,,	तेऽजेन
,,	21	,,	11	,,	गोस्वामी स्वयमीशानो	,,	गोस्वामिसुत ईशानो
,,	,,	,,	14	,,	निशामपमाने	,,	निशामयमाने
,,	22	,,	7	,,	वक्षोजयोः	,,	वक्षोमणेः
	,,	,,	12	,,	रज्जुग्रथनकर्मणा	,,	धात्रा ग्रामक्षये कृताः
	24	,,	12	Re-read as	असत्यं सेवनं पित्रोर्हिंसां चोपाकृतिं पशोः ॥		
	,,	,,	21	For	मुदम्	read	मदम्
	,,	,,	22	,,	स्वान्ते	,,	स्वं ते
	25	,,	22	,,	प्रत्यक्षीकुर्वः	,,	चक्षूकरिष्यावः
	26	,,	8	,,	तृष्णाजवे भवसरस्वति	,,	तृष्णाजवंजवसरस्वति
	,,	,,	13	,,	असृञ्चि	,,	असृञ्जि
	27	,,	5	,,	निर्याञ्चं	,,	निर्याच्चं

॥ श्रीशंकरगुरुकुलपत्रिका

THE JOURNAL

OF THE

SRI SANKARAGURUKULAM, SRIRANGAM.

Editor: Gurubhaktasikhamani, Sastraprasarabhushana, T. K. Balasubrahmanya Aiyar, B A., Founder of Sri Sankaragurukulam, Srirangam.

Literary Adviser: Vidyasagara, Vidyavacaspati, P. P. Subrahmanya Sastri B. A. (Oxon), M. A., Curator, Government Oriental Manuscripts Library and Professor of Sanskrit, Presidency College, Madras.

The Main features are:

1. The publication of rare and hitherto unpublished works of writers of established reputation on all branches of learning bearing on Hindu Culture and Learning.
2. The reviewing of books and periodicals on current thought.
3. The encouraging of the production of original compositions in Sanskrit by contemporary writers and poets.

Annual Subscription Rs. 6/only.

For *bona fide Vidyarthis* on production of certificate from their teacher Rs. 4/only

The Journal is now published Quarterly. If sufficient encouragement is forthcoming it is hoped to convert it into a Bimonthly and even a Monthly.

Advertisement rates are:

1 Full page for one insertion	Rs.	10/
Do. for one year	Rs.	30/-
½ page for one insertion	Rs.	6/-
½ ,, for one year	Rs	20/-

THE MANAGER,

The Journal of the Sri Sankaragurukulam

SRIRANGAM

GANITASARASANGRAHA of Mahaviracarya. Edited with English translation and notes by Rao Bahadur M. Rangacharya, M. A. 1912.

PADYACUDAMANI of Buddhaghosa. Edited by Rao Bahadur M. Rangacharya, M.A. and S. Kuppuswami Sastri, M.A., with a commentary written by Pandits K. Venkateswara Sastri and D. S. Satakopacharya. 1921. 3

4. **BRAHMASIDDHI** of Mandanamisra and a commentary thereon by Sankhapani. Edited by Mahamahopadhyaya Vidyavacaspati S. Kuppuswami Sastri, M.A., with a Foreward by Vidyasagara Vidyavacaspati P. P. S. Sastri, B.A. (Oxon)., M.A. (Madras) 1937.

Edited by Vidyasagara Vidyavacaspati P. P. S. SASTRI B.A. (Oxon), M.A. (Madra

---

5. **RATNESVARAPRASADANA NATAKA** of Gururama Kavi. Published by the Sri Balamanorama Press, Mylapore, Madras. 1939. Re.

6. **RAMANUJACAMPU** of Ramanuja
7. **MAHABHASYA** of Patanjali with Annambhatta's Pradipa } In th

[Nos. 6 and 7 are being published in the Madras Government Press.]

8. **SASTRADIPIKA** of Parthasarathi Misra with the Mayukhavali of Sri Appaya Dikshita.

9. **BALABHARATA** of Agastya Pandita with the Manohara of Salva Timmaya Dandanatha-

10. **NAYAMANJARI** of Srimad Appaya Dikshita.

11. **DAMARUKA** of Ghanasyama with Dama·ukavyakhya of Chandrasekhara. Published by the Sri Sankaragurukulam, Srirangam. Re.

12. **SRNGARAPRAKASA** of Maharajadhiraja Sri Bhoja Deva.

[Nos. 8, 9, 10 and 12 are in the Press and published serially by the Sri Sankaragurukulam Srirangam, in the Sri Sankaragurukula Patrika]